# सेवे श्रीकान्तम्

## रागम्ः मोहनकल्याणि     ताळम्ः आदि

(श्री स्वाति तिरुनाळ् विरचित)

**पल्लवि**

सेवे श्रीकान्तम् वरदम्

**अनुपल्लवि**

देवारातिसमूहकृतान्तं
दीनपालनपरं स्मरकान्तम्

**चरणम्**

कुन्तात्युज्ज्वल तापहहासं

गोपरूपमखिलार्त्तिनिरासम्

बृन्दारण्य कृतात्मनिवासं
वीतमलं तिलसूनसुनासम् ॥ १ ॥

नागाराति वरेण्यतुरङ्गं

नारदादि हृदयाम्बुजभृङ्गम्

भोगीन्द्राद्भुतमञ्चमभङ्गं
पूर्णशोभपद निस्सृतगङ्गम् ॥ २ ॥

स्यानन्दूरपुरामलदीपं

सारसाक्षमघशालिदुरापम्

भानुशशाङ्कदृशं वसुधापं
पद्मनाभमवितार्यसुधापम् ॥ ३ ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇